परं द्विकालपायी स्यादह्नः कालेषु बुद्धिमान् ।
प्रयोगे स्नैहिके त्वेकं वैरेच्यं त्रिचतुःपिबेत् ॥
हृत्कण्ठेन्द्रियसंशुद्धिर्लघुत्वं शिरसः शमः ।
यथेरितानां दोषाणां सम्यक् पीतस्य लक्षणम् ॥
बाधिर्य्यमान्ध्यं मूकत्वं रक्तपित्तं शिरोभ्रमम् ।
अकाले चातिपीतश्च धूमः कुर्य्यादुपद्रवान् ॥"
"न विरिक्तः पिबेद्धूमं न कृते वस्तिकर्म्मणि ।
न रक्ती न विषेणार्त्तो न शोची न च गर्भिणी ॥
न श्रमे न मदे नामे न पित्ते न प्रजागरे ।
न मूर्च्छाभ्रमतृष्णासु न क्षीणे नापि च क्षते ॥
न मद्यदुग्धे पीत्वा च न स्नेहं नच माक्षिकम् ।
धूमं न भुक्त्वा दध्ना च न रूक्षः क्रुद्ध एव च ॥
न तालुशोषे तिमिरे शिरस्यभिहते न च ।
न शङ्खके न रोहिण्यां न मेहे न मदात्यये ॥
एषु धूममकालेषु मोहात् पिबति यो नरः ।
रोगास्तस्य प्रवर्द्धन्ते दारुणा धूमविभ्रमात् ॥"
इति चरके सूत्रस्थाने पञ्चमेऽध्याये ॥
"धूमः पञ्चविधो भवति तद्यथा, प्रायोगिकः स्नैहिको वैरेचनः कासघ्नो वामनीयश्चेति । तत्रैलादिना कुष्ठतगरवर्ज्जेण श्लक्ष्णपिष्टेन द्वादशाङ्गुलं शरकाण्डं क्षौमेणाष्टाङ्गुलं वेष्टयित्वा लेपयेदेषा वर्त्तिः प्रायोगिके । स्नेहफलसारमधूच्छिष्टसर्ज्जरसगुग्गुलुप्रभृतिभिः स्नेहमिश्रैः स्नैहिके । शिरोविरेचनद्रव्यैर्वैरेचने । वृहतीकण्टकारिकात्रिकटुकासमर्द्दहिङ्गुदीत्वङ्मनःशिलाच्छिन्नरुहाकर्कटशृङ्गीप्रभृतिभिः कासहरैश्च कासघ्ने । स्नायुचर्म्मखुरशृङ्गकर्कटकास्थिशुष्कमत्स्यवल्लूरकृमिप्रभृतिभिर्वामनीयैश्च वामनीये ॥"
"मुखेन तं पिबेत् पूर्व्वं नासिकाभ्यां ततः पिबेत् ।
मुखपीतं मुखेनैव वमेत् पीतञ्च नासया ॥
मुखेन धूममादाय नासिकाभ्यां न निर्हरेत् ।
तेन हि प्रतिलोमेन दृष्टिश्च विहन्यते ॥"
"अकालपीतः कुरुते भ्रममूर्च्छाशिरोरुजः ।
घ्राणश्रोत्राक्षिजिह्वानामुपघातञ्च दारुणम् ॥"
"तत्र स्नैहिको वातं शमयति स्नेहादुपलेपाच्च । वैरेचनः श्लेष्माणमुत्क्लेश्यापकर्षति रौक्ष्यात्तैक्ष्ण्यादौष्ण्याद्वैशद्याच्च । प्रायोगिकः श्लेष्माणमुत्क्लेशयत्युत्क्लिष्टं चापकर्षति साधारणत्वात् पूर्व्वाभ्यामिति ॥"
"नरो धूमोपयोगाच्च प्रसन्नेन्द्रियवाङ्मनाः ।
दृढ़केशद्विजश्मश्रुसुगन्धिविशदाननः ॥"
"प्रायोगिकं त्रींस्त्रीनुच्छ्वासानाददीत । मुखनासिकाभ्याञ्च पर्य्यायांस्त्रींश्चतुरो वेति ॥ स्नैहिकं यावदश्रुप्रवृत्तिः वैरेचनिकमादोषदर्शनात् । तिलतण्डुलयवागूं पीतेन पातव्यो वामनीयः ग्रासान्तरेषु कासघ्न इति ।" इति सुश्रुते चिकित्सितस्थाने ४० अध्यायः ॥

धूमकेतनः, पुं, (धूमः केतनं ध्वजश्चिह्नं यस्य ।) अग्निः । (यथा, रघुः । ११ । ८१ ।
"निघ्नभञ्च रिपुरास भूभृतां
धूमशेष इव धूमकेतनः ॥")
केतुग्रहः । इति मेदिनी । ने, २३८ ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ८२ ।
"वृषणः शङ्करो नित्यं वर्चस्वी धूमकेतनः ॥")

धूमकेतुः, पुं, (धूमः केतुश्चिह्नं यस्य ।) अग्निः । (यथा, महाभारते । १ । १०३ । १७ ।
"प्रभां समुत्सृजेदर्क्को धूमकेतुस्तथोष्णताम् ॥")
उत्पातविशेषः । स धूमाभा तारका । इत्यमरभरतौ ॥ (यथा, कुमारे । २ । ३२ ।
"भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः ।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः ॥")
ग्रहभेदः । इति विश्वः ॥ * ॥ केतवश्च शिखावन्ति ज्योतींषि स्थिराण्युत्पातरूपाणि । तदुदये कालाशुद्धिर्यथा,—
"धूमकेतौ समुत्पन्ने ग्रहणे चन्द्रसूर्य्ययोः ।
ग्रहाणां सङ्गरे चैव न कुर्य्यान्मङ्गलक्रियाम् ॥
उल्कापाते च त्रिदिनं धूमे पञ्च दिनानि च ।
वज्रपाते दिनञ्चैकं वर्ज्जयेत् सर्व्वकर्म्मसु ॥"
इति गर्गवचनम् ॥
भोजराजः ।
"ग्रहे रवीन्दोर्द्धरणीप्रकम्पे
केतूद्गमोल्कापतनादिदोषे ।
व्रते दशाहानि वदन्ति तज्ज्ञा-
स्त्रयोदशाहानि वदन्ति केचित् ॥
वज्रकेतूद्गमोत्पाते ग्रहणे चन्द्रसूर्य्ययोः ।
प्रयाणन्तु त्यजेत् क्षत्त्रः सप्तरात्रमतःपरम् ॥
ब्राह्मणः क्षत्त्रियो वैश्यस्त्यजेत् कर्म्म त्रिरात्रकम् ।
शूद्रस्त्वह्ना चैकरात्रं सर्व्वकर्म्म समाचरेत् ॥"
इति मलमासतत्त्वम् ॥
अथ केतूनां संस्थानम् ।
"शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम् ।
बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम् ॥"
तथा च पराशरः । "शतमेकोत्तरं केतूनां भवन्ति तेषां षोड़श मृत्युनिश्वासजाः । द्वादशादित्यसम्भवाः । दश दक्षमखविलयने रुद्रक्रोधजाः । सप्त पैतामहाः । पञ्चदश वर्षे वौद्दालिकस्य पुत्त्राः । सप्तदश मरीचिकश्यपललाटजाः । पञ्च च प्राजापतिसहजाः । त्रयो विभावसुजाः । धूमोद्भवश्चैकः । चतुर्द्दश मथ्यमानेऽमृते सोमेन सह सम्भूताः । एकस्तु ब्रह्मकोपजः ॥" * ॥ गर्गादयः सहस्रं वदन्ति । तथा च गर्गः ।
"अमित्योदयचाराणामशुभानाञ्च दर्शनम् ।
आगन्तूनां सहस्रं स्याद्ग्रहाणां संनिबोध मे ॥"
नारदाख्यो मुनिरेकमेव केतुं बहुरूपं प्राह । यथा,—
"दिव्यान्तरीक्षभौमस्य एकः केतुः प्रकीर्त्तितः ।
शुभाशुभफलं लोके ददात्यस्तमयोदये ॥"
तत्र धूमकेतुलक्षणम् ।
"उक्तविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः ।
इन्द्रायुधानुकारी विशेषतो द्वित्रिचूलो वा ॥"
"ह्रस्वतनुः प्रसन्न इत्यस्मादुक्तात् यो विपरीतो विशेषतः शक्रचापरूपकेतुरुत्पन्नः स धूमकेतुः स च न शुभकरः पापं करोतीत्यर्थः इन्द्रधनुःसदृशो न शुभकर एव तथा द्विशिखस्त्रिशिखश्च विशेषतः पापफलदः । तथा च समयसंहितायाम् । अचिरस्थितोऽतिह्रस्वस्तमितः स्निग्धमूर्त्तिरुदगुदितः । ह्रस्वतनुः प्रसन्नः केतुर्लोकस्याभावाय न शुभो विपरीतो विशेषतः शक्रचापसङ्काशः । द्वित्रिचतुश्चूलो वा दक्षिणसंस्थश्च मृत्युकरः ।" इति भट्टोत्पलकृतवराहसंहिताटीका ॥ (अश्वविशेषः । यथा, नकुलकृताश्वचिकित्सके । ४ । २६ ।
"पुच्छदेशे यदावर्त्तो वाजिनः संप्रदृश्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो नृपैः ॥"
तथाच युक्तिकल्पतरौ ।
"पृष्ठवंशे यदावर्त्त एकः संपरिलक्ष्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो नृपैः ॥"
महादेवः । यथा, महाभारते । १३।१७।१०३।
"धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा ॥")

धूमगन्धिकं, क्ली, (धूमस्येव गन्धो यस्य । समासे इत् । ततः स्वार्थे कन् ।) रोहिषतृणम् । इति भावप्रकाशः ॥

धूमजाङ्गजं, क्ली, (धूमजस्य मेघस्य अङ्गम् धूमजाङ्गं वज्रं तस्माज्जायते इति । जन + डः ।) वज्रक्षारम् । इति राजनिर्घण्टः ॥

धूमध्वजः, पुं, (धूमः ध्वजश्चिह्नं यस्य ।) अग्निः । इति हेमचन्द्रः । ४ । १६३ ॥ (यथा, सर्व्वदर्शनसंग्रहे चार्व्वाकदर्शने ।
"कथमन्यथा धूमोपलम्भानन्तरं धूमध्वजे प्रेक्षावतां प्रवृत्तिरुपपद्येत ॥")

धूमप्रभा, स्त्री, (धूमस्य प्रभा इव प्रभा यस्याः ।) धूमान्धकारनरकः । इति हेमचन्द्रः । ५ । ३ ॥

धूममहिषी, स्त्री, (धूमस्य महिषीव ।) कुज्झटी । इति त्रिकाण्डशेषः ॥

धूमयोनिः, पुं, (धूम एव योनिरुत्पत्तिकारणं यस्य ।) मेघः । (धूमविशेषोद्भवमेघफलं यथोक्तं चिन्तामणिधृतवचने ।
"यज्ञधूमोद्भवं त्वभ्रं द्विजानाञ्च हितं स्मृतम् ।
दावाग्निधूमसम्भूतमभ्रं वनहितं स्मृतम् ॥
मृतधूमोद्भवं त्वभ्रमशुभाय भविष्यति ।
अभिचाराग्निधूमोत्थं भूतनाशाय वै द्विजाः ॥")
मुस्तकः । इत्यमरः ॥

धूमलः, पुं, (धूमवद्वर्णं लातीति । ला + कः ।) कृष्णलोहितवर्णः । (यथा, नैषधे । १६ । ५ ।
"अपि मधुकरी कालिंमन्या विराजति धूमलच्छविरिव रवेर्लीलालक्ष्मीं करैरतिपातुकैः ॥")
तद्युक्ते, त्रि । इत्यमरः । १ । ५ । १६ ॥

धूमसंहतिः, स्त्री, (धूमस्य संहतिः समूहः ।) धूमसमूहः । इति हलायुधः ॥

धूमसी, स्त्री, रोटिकाविशेषः । यथा, भावप्रकाशे ।
"माषाणां दालयस्तोये स्थापितास्त्यक्तकञ्चुकाः ।
आतपे शोषिताः पात्रे पिष्टास्ता धूमसी स्मृता ॥
धूमसी रचिता सैव प्रोक्ता भर्भरिका बुधैः ।
भर्भरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता ॥"